दिनाङ्क:-07.12.2025

प्रात: - 06:55

प्रधानमन्त्री/एच.टी.शिखरसम्मेलनम्

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् भारतं सम्प्रति विश्वस्य कृते उच्चविकासस्य न्यून-मुद्रास्फीतेः च आदर्शरूपम् अस्ति। नवदिल्ल्याम् एकस्मिन् कार्यक्रमे श्रीमोदी अवदत् यत् प्रवर्तमान-वित्तवर्षस्य द्वितीये त्रिमासे सकल-राष्ट्रियोत्पाद-मितौ वृद्धिः देशस्य वर्धमान-प्रगतेः प्रतिबिम्बरूपा अस्ति। सः अवदत् यत् एषा न केवलं काचित् सङ्ख्या, अपितु शक्तं, विशालं च आर्थिकं प्रतीकरूपम् यद् हि वैश्विकार्थ-व्यवस्थायाः विकास-रूपेण भारतस्य स्थितिं प्रतिबिम्बयति।

====================================

वित्तमन्त्री/शिखरसम्मेलनम्

वित्तमन्त्री निर्मला सीतारमणः अवदत् यत् करव्यवस्थां सरलीकर्तुं केन्द्र-प्रशासनं कार्यरतम् अस्ति, अपि च आयकर-प्रक्रिया सम्प्रति पुनः कठिना न भविष्यति। ह्यः नवदिल्ल्याम् एकस्याः स्वायत्त-पत्रकारिता-संस्थायाः शिखर-सम्मेलने सा अवदत् यत् नागरिकाणाम् उत्थानाय आयकरस्य प्रणाली पारदर्शिनी सरला च भवेद् इति अपेक्षितम् अस्ति। सा अवदत् यत् विगतवर्षद्वयात् प्रशासनं निरन्तरं सीमाशुल्कं न्यूनीकरोति, अपि च सीमाशुल्कं सरलम् अधिकं पारदर्शिनं च कर्तुं प्रयासरतं वर्तते।

====================================

इंडिगो/नागरिकोड्डयनमन्त्रालय:

नागरिकोड्डयन-मन्त्रालयः इंडिगो-विमान-समवायं यात्रिभ्य: लम्बित-देयराशिम् अचिरं प्रदातुं निर्दिष्टवान्। मन्त्रालयेन उक्तं यत् सर्वाभ्यः निरस्त-बाधित-वैमानिक-सेवाभ्यः लम्बित-देय-राशे: प्रक्रिया अद्य रात्रौ अष्ट-वादनं यावत् सम्पन्ना स्यात्। अपि च, तेभ्य: यात्रिभ्य: पुनर्निधारण-शुल्कम् अपि न स्वीकरणीयं येषां यात्रा विमान-निरस्तीकरणात् प्रभाविता। एतादृशी स्थिति: तावत् पर्यन्तं प्रभाविनी भविष्यति यावत् पर्यन्तं स्थिति: सामान्या न भविष्यति। अस्य उद्देश्यं विपणिषु मूल्य-निर्धारणम्, अनुशासन-सन्धारणं च वर्तते। अपि च, वरिष्ठ-नागरिकाणां, छात्राणां रुग्णानां च उत्पीडनस्य अपाकरणं वर्तते। मन्त्रालयेन एतद् अपि उक्तं यत् देय-राशि-प्रक्रियायां यदि किद्दग्विधः विलम्बः अनपुालनं वा भविष्यति तर्हि तत्कालमेव यथोचित-पदक्षेपः ग्रहीष्यते।

====================================

संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

***ऋतुः***

**अद्य दिल्ली-पञ्जाब-हरियाणा-चण्डीगढ-झारखण्ड-छत्तीसगढ-मध्यप्रदेश-ओडिशासु भिन्न-स्थलेषु शीतलहरी-स्थितिः भवितुम् अर्हति इति भारतीयर्तु-विज्ञान-विभागस्य अनुमानः अस्ति। विभागेन उक्तं यत् अद्य यावत् पूर्वोत्तर-भारतस्य असम-मेघालय-नागालैण्ड-मणिपुर-मिजोरम-त्रिपुरासु प्रातः सघन-कुज्झटिकायाः सम्भावना अस्ति।**

**====================================**

**क्रिकेट्**

**भारत-दक्षिणाफ्रीका-दलयोः मध्ये आयोजिता पुरुषाणाम् एकदिवसीय-क्रिकेट्-क्रीडा-शृङ्खला भारतेन गतवासरे द्वे-एकम् इत्येतेन खेलान्तरालेन जिता। विशाखापत्तने ACA-VDCA-क्रीडाङ्गणे समायोजितायां तृतीयायाम् अन्तिमायां च स्पर्धायां भारतेन एकसप्तत्युत्तर-द्विशत-धावनाङ्कानां लक्ष्यं चत्वारिंशत्-क्षेपचक्राभ्यन्तरे एक-क्रीडक-हानि-पूर्वकम् अधिगतम्।**

**=======================================**